श्रीश्री गुरुगौराङ्गौ जयतः

# कृष्णचरितम्

कक्षा ८



भक्तिवेदान्त गुरुकुलम् एवम् अन्तर्राष्ट्रियविद्यालयः, वृन्दावनम्

संस्थापकाचार्यः – कृष्णकृपामूर्तिः अभयचरणारविन्दभक्तिवेदान्तस्वामीप्रभुपादः

लेखकाः

लीलापुरुषोत्तमदासः

बलरामकृपादासः

पवनगोयलः

# विषय–सूची


| अध्यायः | विषयः | पृष्ठः |
|---|---|---|
| प्रथमः | अजामिलचरितम् | २ |
| द्वितीयः | पूतना मोचनम् | ८ |
| तृतीयः | वृन्दावनकृष्णः | १५ |
| चतुर्थः | रथयात्रा महोत्सवः | १९ |
| पञ्चमः | कथोपकथनम् – ३ ( क्रीडा ) | २५ |
| षष्ठः | कथोपकथनम् – ४ ( गुरुकुले जन्माष्टमीमहोत्सवः ) | ३० |
| सप्तमः | सर्वप्रदाता श्रीकृष्णः – १ | ३९ |
| अष्टमः | सर्वप्रदाता श्रीकृष्णः – २ | ४७ |

प्रथमः अध्यायः

# अजामिलचरितम्

कान्यकुब्जे अजामिलः नाम कश्चित् द्विजः आसीत् । सः एकां नष्टचरित्रां दासीं पत्नीरूपेण अङ्गीकृतवान् । सः दास्याः संसर्गेण दूषितः द्विजः सदा–चारम् अपि त्यक्तवान् । सः कैतवैः चौर्यैः अन्याभिः गर्हितवृत्तिभिः च जनान् पीडितवान् । एवं सः कुटुम्बभरणार्थाय अशुचिवित्तम् अर्जयति स्म । सः एवं निवसन् पत्नीसुतान् पालयन् अष्टाशीतिवर्षाणि व्यतीतवान् । तस्य दश–पुत्राः आसन् । तेषु अवमः नारायणः नाम पुत्रः आसीत् । नारायणः पितुः अतीव प्रियः आसीत् । अजामिलः नारायणस्य कलभाषिणीं वाणीं श्रुत्वा आ–नन्दं अनुभवति स्म । सः खादन् नारायणम् आहूय तम् अपि भोजयति स्म । सः पिबन् बालम् अपि पाययति स्म ।

एवं वर्तमानः सः मूढः स्वान्तकम् आगतम् न ज्ञातवान् । यमदूताः तस्य मृत्युकाले हस्तेषु मृत्युपाशं धृत्वा तं यमपुरीं नेतुं तत्र आगताः । सः व्याकुलः अजामिलः अतिदारुणान् त्रीन् पुरुषान् दृष्ट्वा उच्चस्वरेण बालपुत्रं नारायणम् आहूतवान् । विष्णुपार्षदाः म्रियमाणस्य अजामिलस्य मुखतः नारायणं निशम्य सहसा तत्र आयाताः । यदा यमदूताः अजामिलस्य अन्तःहृदयात् तं विकर्षितुं प्रयासं कुर्वन्तः आसन् तदा विष्णुदूताः स्वबलेन तेषां वारणं कृतवन्त । यमदूताः आश्चर्यचकिताः अभवन् । ते यमदूताः ‘अजामिलः तु महा–पातकः यमदण्डयोग्यः च’ इति विष्णुदूतेभ्यः शास्त्रप्रमाणं दत्तवन्तः । अजामिलः शास्त्रम् उल्लङ्घ्य



अतिगर्हितानि कर्माणि कृतवान् अतः सः अशुध्दः अघायुः च अस्ति ।

विष्णुदुताः एवं श्रुत्वा प्रहस्य च कथितवन्तः यत् यस्मिन् क्षणे विवशः अजामिलः हरेः नाम उच्चारितवान् तस्मिन् क्षणे एव तस्य कोटिजन्मार्जितानि पापानि नष्टानि जातानि । सः अजामिलः अन्तकपूर्वम् अज्ञातावस्थायां स्वपुत्रं वारं वारं नारायण इति नाम्ना आहूय स्वाघान् नष्टवान् । यदि यः कश्चित् अपि जनः विष्णुनामानि परिहास्ये वा हेलायाम् वा कीर्त्तयति तर्हि तस्य जनस्य अशेषानि अघानि विनश्यन्ति इति सर्वशास्त्राणां दृढमतम् अस्ति । यमदूताः विष्णुदूतेभ्यः शास्त्रप्रमाणं श्रुत्वा अजामिलं च मुक्तं कृत्वा यमपुरीं निवर्तिताः (निवर्तितवन्तः) ।

एतं वार्तालापं श्रुत्वा अजामिलस्य हृदये शास्त्रज्ञानं स्फुरितम् । अजामिलः स्वपापकर्मभिः लज्जितः भूत्वा विष्णुदूतान् शरणं गतवान् । सः स्वगृहं त्यक्त्वा हरिद्वारे निरन्तरं हरिभजने संलग्नः जातः । सः कृष्णप्रेमाबद्धः अजामिलः हरिं स्मरन् शरीरं त्यक्त्वा वैकुण्ठं प्राप्तवान् । जनाः अजामिलचरितं श्रुत्वा युगे युगे हरिनाममाहात्म्यं च ज्ञात्वा हरिभजनम् एव करणीयम् इति निश्चयं कुर्वन्ति ।



* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. कान्यकुब्जे कः नाम द्विजः आसीत् ?

२. सः कां स्वपत्नीरूपेण स्वीकृतवान् ?

३. सः जनान् कथं पीडितवान् ?

४. अजामिलेन जीवनस्य कति वर्षाणि व्यतीतानि ?

५. अजामिलस्य पुत्रस्य नाम किम् आसीत् ?

६. यमदूताः अजामिलं नेतुम् कुत्र आगताः ?

७. विष्णुदूताः किं श्रुत्वा अजामिलस्य निकषा आगतवन्तः ?

८. हरिनामग्रहणे किं भवति ?

९. अजामिलः कान् शरणं गतः ? शरीरान्ते सः कं प्राप्तवान् ?

१०. जनाः किं निश्चयं कुर्वन्ति ?

११. यमदूतविष्णुदूतयोः मध्ये जातं संवादं स्व अवगमनानुसारं वर्णयन्तु ।

१२. अजामिलस्य सङ्क्षिप्तचरितं स्वशब्देषु विविच्यताम् ।

## *रिक्त–स्थानं पूरयन्तु*

१. ____________ अजामिलः नाम कश्चित् द्विजः आसीत् ।

२. सः कैतवैः चौर्यैः अन्याभिः __________ च जनान् पीडितवान् ।

३. सः एवं निवसन् पत्नीसुतान् पालयन् ____________ यावत् व्यतीतवान् ।

४. अजामिलः नारायणस्य ____________वाणीं श्रुत्वा आनन्दं अनुभवति स्म ।

५. ___________ म्रियमाणस्य अजामिलस्य मुखतः ________ निशम्य सहसा तत्र आयाताः ।

६. सः कृष्णप्रेमाबद्धः अजामिलः हरिं स्मरन् शरीरं त्यक्त्वा __________ प्राप्तवान् ।

७. जनाः अजामिलचरितं श्रुत्वा युगे युगे हरिनाममाहात्म्यं ज्ञात्वा च

_________ एव करणीयम् इति निश्चयं कुर्वन्ति ।

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् अवलोक्य वाक्यानि रचयन्तु ।

कृतवान् – [कृ]

सः स्नानं **कृतवान्** ।

पिबति – [पा]

सः आम्ररसं **पिबति** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

प्राप्तवान् [प्र+आप्+क्तवतु], आगताः [आ+गम्+क्त], आसीत् [अस्], उच्चारितवान् [उत्+चर्+क्तवतु], आहूतवान् [आ+ह्वे+क्तवतु], आहूय [आ+ह्वे+ल्यप्], पाययति [पा+णिच्], भोजयति [भुज्+णिच्], जातः [जन्+क्त], नष्टवान् [नश्+क्तवतु], दत्तवान् [दा+क्तवतु], ज्ञातवन्तः [ज्ञा+क्तवतु], त्यक्तवान् [त्यज्+क्तवतु], पीडितवान् [पीड्+क्तवतु]।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सुष्ठुप्रकारेण अवलोक्य वाक्यानि रचयन्तु ।

हरिभजनम् – [हरिभजन]

कलियुगे **हरिभजनम्** एव करणीयम् ।

वैकुण्ठम् – [वैकुण्ठ]

नारायणभक्तः **वैकुण्ठं** प्राप्नोति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

विष्णुदूताः [विष्णुदूत], यमदूताः [यमदूत], अघानि [अघ], संसर्गेण [संसर्ग]

च). यदि – चेत् :–
**यदि** वृष्टि भवति **चेत्** शस्यं भविष्यति ।
**यदि** भगवन्नाम् गृह्णाति **चेत्** पापं नश्यति ।
**यदि** भगवद्भजनं न करोति **चेत्** नरकः गन्तव्यः भविष्यति ।

च). नोचेत् :–
प्रतिदिनं पठतु **नोचेत्** सर्वं विस्मरिष्यति।
दानं ददातु **नोचेत्** धनं नंक्ष्यति।

४. अनिश्चित–संख्यावाचकविशेषणम् :–
स्त्रिलिङ्गे एकवचनम् ।
क). काचित् :–
**काचित्** महिला आगत्य प्रतिदिनं कथां श्रुणोति ।
**काचित्** स्त्री मम पार्श्वे धनं याचितुं आगतवती ।

पुर्लिङ्गे एकवचनम् ।
ख). कश्चित् :–
**कश्चित्** जनः प्रतिदिनं मम पृष्ठतः आगच्छति ।
**कश्चित्** देवः अस्ति यः मां रक्षति ।
**कश्चित्** तु अस्ति एव एतस्य विश्वस्य सृष्टा ।
**कश्चित्** भक्तः गृहं त्यक्त्वा मन्दिरम् आगतः ।

नपुसकलिङ्गे एकवचनम् ।
ग). किञ्चित् :–
एतस्मिन् मार्गे **किञ्चित्** यानं दृष्टं किम् ?
अहं **किञ्चित्** धर्मपुस्तकं पठितवान् ।
मया **किञ्चित्** जलं पीतम् ।
सरोवरे **किञ्चित्** जलम् अस्ति ।

घ). स्त्रिलिङ्गे बहुवचनम् ।

काश्चित् :– **काश्चित्** बालाः बुद्धिमत्यः भवन्ति ।

**काश्चित्** महिलाः आगत्य प्रतिदिनं कथां शृण्वन्ति ।

**काश्चित्** स्त्रियः मम पार्श्वे धनं याचितुं आगतवत्यः ।

ङ). पुर्लिङ्गे बहुवचनम् ।

केचित् :– एतस्मिन् संसारे **केचित्** जनाः एव प्रियवादिनः सन्ति ।

सप्तकक्षायां **केचित्** छात्राः उत्तीर्णाः जाताः ।

**केचित्** देवाः सन्ति । ये मां रक्षन्ति ।

च). नपुसकलिङ्गे बहुवचनम् ।

कानिचित् :– सरोवरे **कानिचित्** पुष्पाणि विकसितानि सन्ति ।

एतस्मिन् मार्गे **कानिचित्** यानानि दृष्टानि किम् ?

अहं **कानिचित्** धर्मपुस्ताकानि पठितवान् ।

**प्रयोगाः :–**

पुल्लिङ्गम् :–

**कश्चित्** जनः अस्ति । **केचित्** जनाः सन्ति ।

**कश्चित्** विद्यालयः अस्ति । **केचित्** विद्यालयाः सन्ति ।

स्त्रीलिङ्गम् :–

**काचित्** विदुषी अस्ति । काश्चित् विदुष्यः सन्ति ।

**काचित्** चिकित्सका अस्ति । **काश्चित्** चिकित्सकाः सन्ति ।

नपुंसकलिङ्गम् :–

किञ्चित् यानम् अस्ति । कानिचित् यानानि सन्ति ।

किञ्चित् वनम् अस्ति । कानिचित् वनानि सन्ति ।

द्वितीयः अध्यायः

# पूतना मोचनम्



एकदा पूतनानाम्नी एका खेचरी उड्डयनं कृत्वा नन्दगोकुलं आगतवती । सा स्वमायया देवीरूपेण नन्दगृहे स्थिताः सर्वाः स्त्रीः मोहितवती । व्रजस्त्रियः तां सुन्दरीं वनितां दृष्ट्वा अचिन्तयन् यत् एषा वनिता श्रीः एव स्वपतिं द्रष्टुम् अत्र आगता अस्ति । पूतना गोकुलम् आगमनात् पूर्वम् एव–कंसनिर्देशेन वहून् शिशून् हतवती आसीत् । सा बालकृष्णं हन्तुम् एव तस्य अन्वेषणं कुर्वती नन्दगृहम् आगतवती । बालघातनी पूतना तं बालं शय्यायां शयानं दृष्ट्वा प्रसन्ना जाता ।

बालकृष्णः तां बालघ्नीं दृष्ट्वा ज्ञातवान् यत् एषा मां हन्तुम् इच्छया अत्र आयाता अस्ति । सः तां दुष्टां राक्षा
सीं मातृरूपेण आगतां दृष्ट्वा स्वनेत्रद्वयं निमिलितवान् । मुग्धा पूतना शयानं शिशुं निशाम्य (दृष्ट्वा) अङ्कम् आरोपितवती । यशोदा रोहिणी च तस्याः वरस्त्रीरूपिण्याः पूतनाय़ाः चेष्टां न निवारितवत्यौ । पूतनायाः स्तनद्वयं घोरविषयुक्तम् आसीत् । सा क्रूरा श्रीकृष्णं स्वस्तनं बलात् पाययितुं चेष्टितवती । रोषसमन्वितः बालकृष्णः अपि करद्वयेन पूतनायाः स्तनं प्रपीड्य प्राणैः सह पीतवान् । सा हस्तद्वयं पादद्वयं च क्षिपन्ती वारंवारं मुञ्च मुञ्च इति प्रभाष्य रुदितवती । तस्याः रोदनस्य ध्वनिना पर्वतैः सह पृथिवी प्रकम्पिता जाता । जनाः वज्रनिपातसदृशं ध्वनिं श्रुत्वा पतितवन्तः ।

यातनया पीडिता पूतना बालं त्यक्तुं प्रयासं कुर्वती गृहात् बहिः आगत्य इतस्ततः भ्रमन्ती ग्रामात् दूरं गत्वा पतितवती । तस्याः शरीरं मृत्युकाले द्वादशकिलोमिटेरपरिमितं विशालं अद्भुतं च आसीत् । तस्याः शरीरस्य पतनेन द्वादशकिलोमिटेरपरिमितावृताः बृक्षाः नष्टाः जाताः । पूतनायाः विशालमुखे लाङ्गलदण्डाः इव उग्राः दंस्ट्राः आसन् । तस्याः नासिकाद्वयं पर्वतस्य कन्दरवत् आसीत् तथा शैलसदृशं स्तनद्वयम्



आसीत् । तस्याः केशाः प्रकीर्णाः आसन् तथा अन्धकूपौ इव नेत्रे आस्ताम् । नदीतटवत् तस्याः जघने आस्ताम् । बद्धाः सेतवः यथा भवन्ति तथा तस्याः भुजौ पादौ च आसन् । दुष्पारः ह्रदः इव उदरम् आसीत् ।

पूर्वम् एव तस्याः शब्देन भीताः गोपाः अधुना तस्याः शरीरस्य दर्शनेन अति त्रस्ताः जाताः । गोप्यः पूतनायाः वक्षस्थले निर्भयं क्रीडन्तं बालं दृष्ट्वा तस्याः समीपं च गत्वा शीघ्रम् एव तं ग्रहीतवत्यः । रोहिणीयशोदादयः गोप्यः पूतनायाः स्पर्शेण कृष्णस्य शरीम् अशुद्धं मत्वा ताः सर्वाः तं गोमूत्रेण स्नापितवत्यः । ताः गोमयेन बालकृष्णस्य ललाटादिषु द्वादशाङ्गेषु केशवादिभिः नामभिः रक्षां कृतवत्यः । नन्दादयः गोपाः तस्याः विशालस्य शरीरस्य छेदनं कृत्वा दग्धवन्तः । कृष्णस्य स्पर्शेण विशुद्धभूतात् दह्यमानात् शरीरात् सौरभः निर्गतः । पूतना श्रीकृष्णं हन्तुम् इच्छया गोकुलम् आगता । परन्तु कृपामयः भगवान् तां मातृरूपेण आगतां दृष्ट्वा तस्यै धातृ–उचितां गतिं प्रदत्तवान् । यदि यः कश्चित् आनुकूल्येन भक्तिं करोति तदा तस्य सुगतिविषये तु संशयः एव नास्ति । एकः श्रीकृष्णः एव शरणं समस्तजग–ताम् ।

* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. पूतना उड्डयनं कृत्वा कुत्र आगता ?

२. व्रजस्त्रियः तां सुन्दरीं दृष्ट्वा किं अचिन्तयन् ?

३. कृष्णः पूतनां दृष्ट्वा किमर्थं स्वनेत्रद्वयं निमिलितवान्?

४. मृत्युकाले पूतनायाः शरीरं कीदृशं आसीत् ?

५. पूतनायाः मरणकालस्य शरीरस्य वर्णनं कुर्वन्तु ।

६. गोप्यः पूतनायाः स्पर्शेण कृष्णस्य शरीरं अशुद्धं मत्वा किं कृतवत्यः?

७. पूतना गोकुलं किमर्थम् आगता ?

८. कस्य सद्गतिविषये सन्देहः न भवति ?

९. श्रीकृष्णः पूतनायै कां गतिं प्रदत्तवान् ?

१०. एतस्य अध्यायस्य शिक्षां लिखन्तु ।

## *रिक्त–स्थानं पूरयन्तु*

१. एकदा पूतनानाम्नी एका खेचरी उड्डयनं कृत्वा ___________ आ–गतवती ।

२. सः तां दुष्टां राक्षसीं मातृरूपेण आगतां दृष्ट्वा स्वनेत्रद्वयं __________ ।

३. तस्याः शरीरं मृत्युकाले _____________ विशालं अद्भुतं च आसीत् ।

४. सा क्रूरा श्रीकृष्णं स्वस्तनं बलात् पाययितुं ____________ ।

५. मुग्धा पूतना शयानं शिशुं निशाम्य अङ्कम् __________ ।

६. गोप्यः पूतनायाः वक्षस्थले निर्भयं क्रीडन्तं बालं दृष्ट्वा तस्याः समीपं च गत्वा शीघ्रम् एव तं ___________ ।

७. ताः _______ बालकृष्णस्य ललाटादिषु द्वादशाङ्गेषु केशवादिभिः नामभिः रक्षां कृतवत्यः ।
८. यदि यः कश्चित् _______ भक्तिं करोति तदा तस्य सुगतिविषये तु संशयः एव नास्ति ।
९. तस्याः शरीरस्य पतनेन ___________ बृक्षाः नष्टाः जाताः ।
१०. कृष्णस्य स्पर्शेण _______ दह्यमानात् शरीरात् सौरभः निर्गतः ।

*<u>व्याकरण–विभाग</u>*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।
क). आस्ताम् – [भू]
हिरण्यकशिपुहिरण्याक्षौ द्वौ भ्रातरौ **आस्ताम्** ।
ख). पतितवत्यौ – [पत्+क्तवतु]
वृन्दावनम् आगमनसमये ललिताविशाखे यमुनायां **पतितवत्यौ** ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

निवारितवत्यौ [नि+वृ+क्तवतु], उक्तवत्यौ [वच्+क्तवतु], गतवत्यौ [गम्+क्तवतु], कथितवत्यौ [कथ्+क्तवतु], कृतवत्यौ [कृ+क्तवतु], स्तः [अस्+क्त] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।
क). अन्धकूपौ – [अन्धकूप]
पूतनायाः नासिके **अन्धकूपौ** इव आस्ताम् ।
ख). नेत्रे – [नेत्र]
रङ्गनाथस्य द्वे **नेत्रे** अतीव रमणीये स्तः ।
उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

पादौ [पाद], गोप्यौ [गोपी], स्त्रियौ [स्त्री], भगिन्यौ [भगिनी], पर्वतौ [पर्वत], भक्तौ [भक्त], मन्दिरे [मन्दिर], हस्तौ [हस्त], वृक्षौ [वृक्ष]।

३. त्रिषु कालेषु त्रिषु लिङ्गेषु च वर्तमानभूतभविष्यत्कालिकक्रियापदानां द्विवचनप्रयोग : –

अ). प्रयोगः–

१. सैनिकः युद्धक्षेत्रं **गच्छति** । सैनिकौ युद्धक्षेत्रं **गच्छतः**। सैनिकाः युद्धक्षेत्रं **गच्छन्ति** ।
२. अहं मन्दिरं **गच्छामि** । आवां मन्दिरं **गच्छावः** । वयं मन्दिरं **गच्छामः**।
३. सः वृन्दावनं **गच्छति** । तौ वृन्दावनं **गच्छतः** । ते वृन्दावनं **गच्छन्ति** ।
५. माता शिशुं दुग्धं **पाययति** । मातरौ शिशुं दुग्धं **पाययतः** । मातरः शिशुं दुग्धं **पाययन्ति** ।
६. एकः पर्वतः **अस्ति** । द्वौ पर्वतौ **स्तः**। त्रयः पर्वताः **सन्ति** ।
७. गङ्गाम् उभयतः पर्वतौ **स्तः** ।
८. वृन्दावने द्वौ प्रसिद्धौ मन्दिरे **स्तः** ।
९. द्वौ बालकौ **पठतः** ।
१०. द्वौ भक्तौ मन्दिरे **निवसतः** ।

स्त्रीलिङ्गम् :–

१. मम पार्श्वे द्वे लेखिन्यौ **स्तः** ।
२. द्वे भगिन्यौ विद्यालयं **गच्छतः** ।
३. द्वे लते **पततः** ।
४. आवां द्वे भाषे **जानीवः** ।
नपुंसकलिङ्गम् :–

१. द्वे वाहने **गच्छतः** ।
२. २. पत्रे **पततः** ।
३. ३. पुस्तके **पठ्येते** ।

पुल्लिङ्गम् –

१. द्वौ राजानौ **भवतः** ।
२. द्वौ पुरुषौ **वदतः** ।
३. द्वौ धर्मौ **वर्धेते** ।
४. कथाकारौ कथां **कुरुतः** ।

आ). भूतकालिकप्रयोगः द्विवचने ।

१. यशोदारोहिण्यौ पूतनां न **निवारितवत्यौ** ।
२. कृष्णबलरामौ कोकिलवनं **गतवन्तौ** ।
३. मधुमङ्गलसुबलौ कृष्णाय रसगोलकानि **आनीतवन्तौ** ।
४. कृष्णबलरामौ गृहे **आस्ताम्**

इ). भविष्यत्कालिकप्रयोग : द्विवचने ।

१. द्वौ राजानौ **भविष्यतः** ।
२. द्वौ पुरुषौ **वदिष्यतः** ।
३. द्वौ धर्मौ **वर्धिष्येते** ।
४. कथाकारौ कथां **करिष्यतः** ।

सर्वनाम–शब्दाः

एतौ–तौ :– **एतौ** छात्रौ उद्दण्डौ **स्तः** । **तौ** भक्तौ शुद्धौ **स्तः** ।

**एतौ** प्रकोष्ठौ साधुसेवार्थं **स्तः** । **तौ** प्रकोष्ठौ मम कृते **स्तः** ।
**एते** लेखिन्यौ न **चलतः** । **ते** लेखिन्यः **चलतः** ।
**एते** मम भगिन्यौ **स्तः** । **ते** भवतः भगिन्यौ **स्तः** ।

॥ हरि ॐ तत्सत् ॥

तृतीयः अध्यायः

# वृन्दावनकृष्णः



वृन्दावनं कृष्णस्य नित्यलीलास्थलम् अस्ति । एतत् धाम चिन्मयं अस्ति । वृन्दावनधाम कृष्णप्रीत्यै आत्मानं सदा सज्जीकरोति । कृष्णस्य पादकमलौ अतीव कोमलौ स्तः । कृष्णः सदैव वृन्दावने स्वसखिभिः सह रिक्तपादाभ्यां अटति । अतः एतस्य धाम्नः वालुकाकणाः अतीव मृदुलाः कोमलाः च सन्ति । अत्रत्य केचित् वृक्षाः सदैव हरीताः फलैः समृद्धाः च भवन्ति केचित् वृक्षाः पुष्पैः सुसज्जिताः भवन्ति । एते वृक्षाः लताभिः लिप्ताः कृष्णम् आकर्षन्ति । केचित् वृक्षाः कृष्णस्य लीलार्थे निकुञ्जं निर्मान्ति । एतस्य धाम्नः एका विशेषता अस्ति यत् अत्र ग्रीष्मऋतुः अपि वसन्तः इव प्रतीयते । निर्झराः नद्यः ह्रदाः सरोवराः पर्वताः च एतस्य धाम्नः स्वाभाविकीं सुन्दरतां नित्यं वर्धयन्ति । अत्रत्य धीरः समीरः कमलकह्लारपुष्पसुगन्धैर्युक्तः वातावरणं मनोहरं कुर्वन् सर्वत्र वाति । कुसुमितम् एतत् वृन्दावनं हरिततृणैः सदैव परिपूर्णं भवति । गावः कृष्णं प्रसादयितुं रम्भन्ते, भ्रमराः गायन्ति, कोकिलाः कूजन्ति, मयूराः नृत्यन्ति च ।



कृष्णस्य लीलाः नित्याः सन्ति । गोलोकवृन्दावनधाम्नि एताः लीलाः नित्यरूपेण प्रकाशमानाः भवन्ति । भौतिकजगति अपि एताः लीलाः कस्मिन्श्चित् तु भौमवृन्दावने

सम्पाद्यन्ते एव । कृष्णः भौमवृन्दावने प्रतिदिनं गोचारणार्थाय स्वमित्रैः सह भिन्नानि भिन्नानि वनानि गच्छति । बलरामकृष्णादयः गोपाः शिरसि मयूरपुच्छैः कण्ठे वनमालाभिः कटितटे दुकूलैः हस्ते यष्टिभिः च भूषिताः वने विचरन्ति । यदा कृष्णः वेणुं वादयन् नृत्यति तदा सर्वे गोपाः अपि वेणुनादं श्रुत्वा आनन्देन नृत्यन्ति । केचित् करतालैः, केचित् शृङ्गैः, केचन वेणुं वादयन्तः, केचित् गायन्तः कृष्णं प्रशंसन्ति । तत्र तस्य गोचारणसमये प्रतिदिनं कश्चित् असुरः आगत्य लीलायां विघ्नं करोति । कदाचित् कृष्णः कदाचित् बलरामः च आत्ममायया असुरान् विहन्य स्वमित्राणि प्रसादयतः । तौ असुरान् अपि उद्धरतः ।



यदा असुरवधलीलासमाप्तेः पश्चात् मध्याह्नसमयः आयाति तदा कृष्णः मध्याह्नभोजनं कर्तुं उपयुक्तं स्थानम् अन्वेषयति । ते कदाचित् यमुनातटे मृदुवालुकाकणानाम् उपरि उपविश्य भोजनं कुर्वन्ति । कदाचित् ते सरोवरस्य तटे कमलपुष्पसुगन्धवातावरणे उपविश्य भोजनं कुर्वन्ति । कदाचित् ते निकुञ्जे वृक्षस्य अधः उपविश्य यत्र मयूराः नृत्यन्ति कोकिलाः च कूजन्ति तत्र भोजनं कुर्वन्ति । तदा सर्वे गोपबालकाः कृष्णं परितः बहुभिः पंक्तिमण्डलैः कृष्णाभिमुखम् उपविशन्ति । गोपाः कृष्णस्य मुखकमलं पश्यन्तः स्वपात्रेभ्यः स्वादूनि व्यञ्जनानि निचीय स्वयं खादन्ति मित्राणि अपि भोजयन्ति । तैः अजानद्भिः हास्यपरिहास्येन मध्याह्नकालः एवमेव व्यतीयते । ते तत्रैव विश्रामं कुर्वन्ति ।

कृष्णः विश्रामसमये कस्यचित् गोपस्य अङ्के शिरः संस्थाप्य आरमते । केचित् गोपाः कृष्णस्य पादसंवहनं कुर्वन्ति । केचित् व्यजनेन कृष्णम् आह्लादयन्ति । तदा सर्वाः गावः इतस्ततः भ्रममाणाः गोपेभ्यः दूरं गच्छन्ति । गोपाः सायङ्कालागमने सति गाः अदृष्ट्वा भीताः चिन्तिताः च भवन्ति ।

तस्मिन् काले कृष्णः वेणुनादेन सर्वाः गाः आह्वयति । वेणुनादम् आकर्ण्य सर्वाः गाः कृष्णस्य समक्षे उपस्थिताः भवन्ति । कृष्णः एतादृशाः मनोहराः लीलाः कुर्वाणः गोपवृन्दैः सह स्वगृहं प्रत्यागच्छति ।

* हरे कृष्ण *

## *प्रश्नोत्तर–विभागः*

१. वृन्दावनस्य वालुकाकणाः अतीव मृदुलाः किमर्थम् सन्ति ?

२. वृन्दावनस्य सुन्दरतां के वर्धयन्ति ?

३. बलरामादयः गोपाः कैः भूषिताः वने विचरन्ति ?

४. गोपाः कृष्णं कथं प्रशंसन्ति ?

५. रामकृष्णादयः कुत्र उपविश्य भोजनं कुर्वन्ति ?

६. गोपाः कृष्णस्य विश्रामसमये कथं सेवां कुर्वन्ति ?

७. कृष्णः गाः केन माध्यमेन आह्वयति ?

८. कृष्णस्य शोभां स्वशब्देषु वर्णयन्तु ।

९. कृष्णस्य काः विशेषताः सन्ति ?

१०. कृष्णस्य प्रतिदिनस्य दिनचर्यायाः प्रकाशं कुर्वन्तु ।

## *रिक्त–स्थानं पूरयन्तु*

१. कृष्णः सदैव वृन्दावने स्वसखिभिः सह ____________ अटति ।

२. वृन्दावनधाम _________ आत्मानं सदा सज्जीकरोति ।

३. कृष्णं प्रसादयितुं गावः ________, भ्रमराः ________, कोकिलाः _________ मयूराः नृत्यन्ति च ।

४. तदा सर्वे गोपबालकाः कृष्णं ________ बहुभिः पंक्तिमण्डलैः ___________ उपविशन्ति ।

५. कृष्णः विश्रामसमये कस्यचित् गोपस्य ________ शिरः संस्थाप्य ________ ।

६. तस्मिन् काले कृष्णः _________ सर्वाः गाः आह्वयति ।

७. _________ कृष्णः कदाचित् बलरामः च __________ असुरान् विहन्य स्वमित्राणि प्रसादयतः ।

८. केचित् गोपाः कृष्णस्य __________कुर्वन्ति ।

९. तस्मिन् काले कृष्णः __________ सर्वाः गाः आह्वयति ।

१०. केचित् गोपाः कृष्णस्य __________ कुर्वन्ति ।

॥ हरि ॐ तत्सत् ॥

चतुर्थः अध्यायः

# रथयात्रा महोत्सवः



रथयात्रामहोत्सवः पुरातनकालात् जगद्धिताय सर्वजनहिताय च सर्वत्र भव्यरूपेण सञ्चाल्यमानः अस्ति । उत्कलप्रदेशस्य राज्ञा इन्द्रद्युम्नेन एतस्य उत्सवस्य शुभारम्भः जगन्नाथपुर्यां कृतः । जगन्नाथस्वामी साक्षात् भगवान् श्रीकृष्णः एव । सः स्वेच्छया अग्रजबलभद्रेण भगिनीसुभद्रया च साकं पुरीक्षेत्रे महाम्बुधेः तटे निवसति । एतत् नीलाञ्चले स्थितं जगन्नाथमन्दिरं विश्वप्रसिद्धम् अस्ति ।

जगन्नाथः बलभद्रः सुभद्रा च रथयात्रामहोत्सवस्य अवसरे स्वस्य स्वस्य रथोपरि स्थित्वा गुण्डिचामन्दिरं प्रतिगच्छन्ति । जगन्नाथरथः नन्दीघोषनाम्ना प्रसिद्धः बलभद्ररथः तालध्वजनाम्ना प्रसिद्धः तथा सुभद्रारथः दर्पदलननाम्ना प्रसिद्धः अस्ति । भक्ताः रथान् उभयतः चलन्तः रज्जूभिः रथान् आकर्षन्ति । ब्राह्मणाः रथोपरि तिष्ठन्तः घण्टादीनि वाद्यानि वादयन्ति जगन्नाथं पुण्यश्लोकैः स्तुन्वन्ति च । जगन्नाथः घण्टानादं स्तुतिं च उपाकर्ण्य उपस्थितान् भक्तान् सुस्मितेन आशिषति । यदा रथाः मार्गे चलन्ति तदा भक्ताः स्वपारम्परिकरीत्या जगन्नाथस्य कीर्तनं कुर्वन्ति । केचित् भक्ताः तु आनन्देन नृत्यन्ति अपि ।

केचित् भक्ताः पथि रथाग्रे विलुण्ठन्ति । सर्वे दिव्यानन्देन उन्मत्ताः भवन्ति । एषः भव्योत्सवः प्रतिवर्षम् आषाढमासे शुक्लपक्षे द्वितीयायां तिथौ पुरीक्षेत्रसहितेषु अन्येषु अपि स्थानेषु आयोज्यते ।



श्रीलप्रभुपादः १९६७ तमे वर्षे पाश्चात्यजगति अमेरिकादेशस्थिते सान्फ्रान्सिस्कोनगरे प्रथमं वारं रथयात्रायाः उद्घाटनं कृतवान् । रथयात्रामहोत्सवः श्रीलप्रभुपादस्य प्रेरणया भक्तैः अधुनापि विश्वस्य विभिन्नेषु क्षेत्रेषु हर्षेण आयोज्यते । संयुक्तराष्ट्रस्य (अमेरिकादेशस्य) बहुषु नगरेषु अनुमानतः षष्ठि देशेषु यथा कनाडा, साउथ अफ्रीका, दक्षिण अमेरिका, संयुक्तराज्य (यू.के.), यूरोप, पॉलेण्ड, न्यूजीलैण्ड तथा ऑस्ट्रेलिया आदिषु देशेषु अपि उल्लासेन आयोज्यते ।



पञ्चशतवर्षाणिपूर्वं पुरीक्षेत्रं श्रीचैतन्यदेवस्य लीलाकेन्द्रम् आसीत् । श्रीचैतन्यदेवः स्वभक्तैः सह प्रतिवर्षं रथयात्रामहोत्सवे आनन्देन उल्लासेन च सम्मिलितः भवति स्म । सः हरिकीर्तनं कुर्वन् नृत्यति स्म ।

वैदिकशास्त्रानुसारेण रथयात्रायाः अत्यधि–कं माहात्म्यम् अस्ति । जनाः कृपामयजगन्नाथस्य विग्रहस्य दर्शनेन, विशेषरूपेण तस्य विशालस्य वर्तुल–नेत्रद्वयस्य दर्शनात् शीघ्रम् आध्यात्मिकोन्नतिं कुर्वन्ति । ते तत् क्षणे एव

कृतार्थाः भवन्ति । यदि कश्चिद्  चलन्तं रथमपि पश्येत् तथा जगन्नाथस्य स्वागताय उत्तिष्ठेत् चेत् सः तत्क्षणे एव सर्वेभ्यः पापेभ्यः मुक्तः भवति । यः कश्चिद् अपि रथयात्रायाः पुरतः पृष्ठतः वा अनुसरणं करोति, सः नीचजन्मापि भगवतः विष्णोः समानं ऐश्वर्यं प्राप्नोति । अभक्तः व्यक्तिः अपि रथाग्रे केवलं नृत्येन कीर्तनेन च आत्मनि आत्मानं संस्थातुं समर्थः भवति । यः रथयात्रामहोत्सवं संपादयितुं प्रयासं करोति सः निश्चयेन जगन्नाथस्य कृपाभाजनः भवति । कस्यचित् अपि व्यक्तेः परिवारः गृहाः मित्राणि च सर्वे अपि रथयात्रायाः कृते समयदानेन सेवया धनदानेन वा सदा धन्याः सुखिनः च भवन्ति ।

रथयात्रायाः आयोजनस्य बहूनि कारणानि सन्ति । कतिपयाः जनसमूहाः यथा यवनाः म्लेच्छाः चण्डालादयः जगन्नाथमन्दिरं प्रवेशाय वर्जिताः सन्ति । एतेषां पारम्परिकरीत्या प्रवेशस्य अधिकारः नास्ति । अतः महावदान्यः भक्तवत्सलः जगन्नाथः रथोपरि उपविष्टः सन् सर्वेषाम् उपरि कृपावृष्टिं करोति । एतत्तु एतस्य महोत्सवस्य एकं विशेषं कारणं वर्तते । रथयात्रायाः अन्यच्च एकं विशेषं कारणम् अस्ति । एकदा श्रीकृष्णः स्वभक्तैः सह सूर्यग्रहणस्य अवसरे कल्याणप्रदं स्नानं कर्तुं द्वारकातः कुरुक्षेत्रं आयातः । व्रजवासिनः अपि तत्र आगतवन्तः आसन्  । यशोदा राधादयः गोप्यः नन्दादयः गोपाः च राजकीयं वेशभूषायुक्तं कृष्णं दृष्ट्वा प्रसन्नाः न अभवन् । ते सर्वे कृष्णं गोपालकृष्णरूपेण वृन्दावनं निवर्तितुं प्रार्थितवन्तः । ते सर्वे गोपगोप्यः कृष्णं वृन्दावनम् आनेतुं तस्य रथं कर्षितवन्तः । यद्यपि ते तादृशं कर्तुं सफलाः न अभवन् तथापि एतेन रथयात्रायाः उद्देश्यः तु स्पष्टः एव अभवत् ।

महाप्रभुणा अपि व्याख्यातं यत् भक्ताः कृष्णं वृन्दावनं निवर्तयितुं रथं कर्षन्ति यतः वृन्दावनकृष्णः अतीव रमणीयः मनोहरः च अस्ति । सः सदा स्वभक्तैः सह मित्रभावेन सुमधुराः लीलाः संपादयति । साधारणजनानां कृते रथयात्रामहोत्सवः एकं महत्त्वपूर्णम् आध्यात्मिकं च साधनम् अस्ति । जनाः एतस्मिन् उत्सवे प्राचुर्येण भागं स्वीकुर्वन्ति । एतस्य उत्सवस्य ख्यातिः

दिनोत्तरं वर्धते । वस्तुतः रथयात्रामहोत्सवः जनेषु कृष्णभक्तिम् उपजनयति इति एतस्मिन् संबन्धे कथञ्चित् अपि सन्देहः नास्ति ।

* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. रथयात्रामहोत्सवस्य शुभारम्भः केन कृतः ?

२. जगन्नाथस्य मन्दिरं कुत्र अस्ति ?

३. जगन्नाथः बलभद्रः सुभद्रा च रथोपरि स्थित्वा कुत्र गच्छन्ति? तेषां रथानां नामानि अपि लिखन्तु ।

४. यदा जगन्नाथरथः मार्गे चलति तदा भक्ताः किं किं कुर्वन्ति ?

५. रथयात्रामहोत्सवः कस्यां तिथौ आयोज्यते ?

६. श्रीलप्रभुपादः जगन्नाथरथयात्राः शुभारम्भं कदा कस्मिन् च देशे कृतवान् ?

७. जनः सर्वेभ्यः पापेभ्यः कथं मुक्तः भवति ?

८. के के जगन्नाथमन्दिरं प्रवेशाय वर्जिताः सन्ति ?

९. जगन्नाथरथयात्रामहोत्सवस्य मुख्यं कारणं लिखन्तु ।

१०. जगन्नाथः स्वभक्तैः सह केन भावेन सुमधुराः लीलाः संपादयति ?

११. रथयात्रामहोत्सवः जनेषु कां जनयति ?

१२. किं भवता रथयात्रामहोत्सवः दृष्टः ? यदि दृष्टः चेत् कुत्र? वर्णयन्तु ।

१३. एतस्मिन् अध्याये आगताः कथाः प्रकशयन्तु ।

## *रिक्तस्थानं पूरयन्तु*

१. उत्कलप्रदेशस्य राज्ञा ___________ एतस्य उत्सवस्य शुभार–म्भः_________ कृतः ।

२. जगन्नाथस्वामी साक्षात् भगवान् _________ एव ।

३. जगन्नाथः बलभद्रः सुभद्रा च रथयात्रामहोत्सवस्य अवसरे स्वस्य स्वस्य रथोपरि स्थित्वा _________ प्रतिगच्छन्ति ।

४. जगन्नाथरथः ___________ प्रसिद्धः बलभद्ररथः ____________ प्रसिद्धः तथा सुभद्रारथः ___________ प्रसिद्धः अस्ति ।

५. एषः भव्योत्सवः प्रतिवर्षम् _______________________तिथौ पुरीक्षेत्रसहितेषु अन्येषु स्थानेषु अपि आयोज्यते ।

६. श्रीलप्रभुपादः ___________तमे वर्षे पाश्चात्यजगति अमेरिकादेशस्थिते _______________प्रथमं वारं रथयात्रायाः उद्घाटनं कृतवान् ।

७. एकदा श्रीकृष्णः स्वभक्तैः सह __________ अवसरे कल्याणप्रदं स्नानं कर्तुं द्वारकातः _________ आयातः ।

## *व्याकरण– विभागः*

१. तुमुन् प्रत्ययः

भवितुम्, गन्तुम्, लेखितुम्, पातुम्, नेतुम्, वक्तुम्, कथयितुम्, भोक्तुम्, प्रष्टुम्, स्रष्टुम्, पठितुम्, स्नातुम्, धावितुम्, उपवेष्टुम्, उत्थातुम्, खादितुम्, आनेतुम्, स्मर्तुम्, प्रक्षालयितुम्, आगन्तुम्, द्रष्टुम्, कर्तुम्, प्राप्तुम्, सम्पादयितुम् ।

प्रयोगः यथा :–

क). कर्तुम् :– साधकः तपः कर्तुं हिमालयं गच्छति । अहं सेवां कर्तुम् इच्छामि । राधा श्यामस्य दर्शनं कर्तुं इच्छति । यादवाः युद्धं कर्तुं प्रभासक्षेत्रं गतवन्तः । श्रील प्रभुपादः प्रचारं कर्तुं अमेरिकादेशं गतवान् ।

ख). लेखितुम् :– भवान् पत्रं लेखितुं शक्नोति । अहं निबन्धं लेखितुम् इच्छामि । सः हिन्दी लेखितुं न जानाति ।

ग). द्रष्टुम् :– सुदामा कृष्णं द्रष्टुं द्वारकां गतवान् । सुबलः कृष्णं द्रष्टुं यमुना–तटं गच्छति । यशोदा कृष्णं द्रष्टुं भवति ।

घ). आनेतुम् :– व्रजवासिनः कृष्णम् आनेतुं प्रयासं कृतवन्तः ।

ङ). उत्थातुम् :– गुरुकुले प्रतिदिनं सार्द्धत्रिवादने उत्थातुं भवति ।

च). पातुम् :– अहं जलं पातुम् इच्छामि। पवनः अमृतं पातुं मन्थनं कृतवान् ।

छ). वक्तुम् :– शुकः कथां वक्तुं प्रारब्धवान्। सर्वे वक्तुम् एव वाञ्छन्ति ।

ज). गन्तुम् :– सीता रामेण सह वनं गन्तुम् इच्छति ।

झ). प्रष्टुम् :– लक्ष्मणः रामं प्रष्टुं समीपं गतः ।

ञ). स्मर्तुम् :– गीतां स्मर्तुम् एकमासः पर्याप्तः ।

ट). स्रष्टुम् :– वैज्ञानिकाः पुनः स्रष्टुम् इच्छन्ति ।

ठ). धावितुम् :– खञ्जः धावितुं समर्थः नास्ति ।

॥ हरि ॐ तत्सत् ॥

पञ्चमः अध्यायः

# कथोपकथनम् – ३ ( क्रीडा )

( भक्तिवेदान्तगुरुकुलछात्राः क्रीडाप्रतियोगितायां भागं स्वीकृतवन्तः । क्रीडाशिक्षकः राधेश्याममहोदयः छात्रैः सह विमर्शयति । )



**राधेश्यामः** – छात्राः ! एतस्मिन् वर्षे राज्यस्तरीया क्रीडाप्रतियोगिता आगरानगरे भविता अस्ति । अस्माकं विद्यालयः पादकन्दुकक्रीडायां क्षोपाकन्दुकक्रीडायां तरणक्रीडायां बास्केटबॉलक्रीडायां च प्रसिद्धिं प्राप्तवान् । एतस्मिन् वर्षे अपि एतासु क्रीडासु वयं भागं ग्रहीष्यामः । भवतां प्रतिभाः भिन्नासु क्रीडासु सन्ति इति अहं सम्यक् रूपेण जानामि । अधुना अहं भवद्भिः सह विमर्श्य दलत्रयस्य रचनां करिष्यामि । वयं सर्वप्रथमं पाद–कन्दुकक्रीडायाः दलस्य रचनासम्बन्धे विमर्शनं कुर्मः ।

श्यामः – गतवर्षे अस्माकं दलः राज्यस्तरीयायाः पादकन्दुकक्रीडायाः विजेता आसीत् । तस्य वेजेतुः दलस्य इदानीं केवलाः सप्तछात्राः अवशिष्टाः वर्तन्ते । अन्ये छात्राः उत्तीर्णाः भूत्वा निर्गताः ।

राधेश्यामः – आम् ! एते अवशिष्टाः सप्तक्रीडकाः अधुनापि क्रीडितुं योग्याः सन्ति इति मम विचारः । अहं दलं निर्मातुं भवत्सु पञ्चछात्राणां चयनं करिष्यामि ।

यदुः – अस्माकं दलस्य कृते एकस्य कन्दुकग्राहकस्य द्वयोः कन्दुकरक्षकयोः द्वयोः अग्रगयोः च आवश्यकता अस्ति ।
राधेश्यामः – उत्तमम् उत्तमम् । नकुलः कन्दुकग्राहकः भविष्यति । यदुश्यामौ पृष्ठतः कन्दुकरक्षकरूपेण क्रीडिष्यतः । कौ अग्रगौ भविष्यतः ? प्रशान्तः पवनः उमेशः गिरीशः च उत्तमाः अग्रगाः ।

श्यामः – प्रशान्तः वेगेन तु धावति परन्तु लक्ष्यं न साधयति । गिरीशः वेगेन धावति लक्ष्यम् अपि साधयति ।

राधेश्यामः – भवता उत्तमं लक्षितम् । तर्हि गिरीशः एव चीयते । पवनः तु उत्तम अग्रगः अस्ति किन्तु सः कन्दुकं स्वपार्श्वे दीर्घकालं स्थापयति ।

श्यामः – परन्तु महोदय ! एतस्मिन् वर्षे संपन्नजातायां क्रीडायां पवनस्य प्रदर्शनं सर्वेषाम् अपेक्षया उत्तमम् आसीत् । पवनेन अधिकानि गोलानि कृतानि ।

राधेश्यामः – तर्हि पवनः तु दले अग्रगः भविष्यति । उमेशः तु अस्माकं पेनाल्टिकोणदण्डस्य विशेषज्ञः । अतः सः अतिरिक्तः क्रीडकः भविष्यति । एतेन पादकन्दुकदलः संपूर्णः भवति ।

श्यामः – अस्माकं दलस्य नायकः कः ? गतवर्षीयदलस्य नायकः तु विद्यालयात् निर्गतः ।

राधेश्यामः – यदुः दलस्य नायकः भवितुं योग्यः अस्ति । सः अस्माकं दलस्य उत्तमः कन्दुकरक्षकः । सः क्रीडन् कन्दुकं सर्वान् प्रापयति । क्रीडासमये विषमपरिस्थितौ अपि सः अविचलितः एव तिष्ठति ।

राधेश्यामः – विगतवर्षे ये तरणक्रीडायां भागं स्वीकृतवन्तः आसन् तेषु रामं

विहाय सर्वे अपि विद्यमानाः सन्ति । रामः गतवर्षे शतमीटरतरणक्रीडायां प्रथमं स्थानं प्राप्तवान् आसीत् । एतस्मिन् वर्षे विद्यालयस्य शतमीटरतरणप्रतियोगितायाः विजेता कः अभवत् ?



गोपालः – अहं एव विजेता आसम् ।

राधेश्यामः – अस्तु ! भवान् अपि शतमीटरतरणप्रतियोगितायां भागं ग्रहीतुं योग्यः अस्ति ।

मोहनः – महोदय ! अहंम् अपि पञ्चाशत्मीटरतरणप्रतियोगितायां गोविन्दं पराभूय प्रथमः अभवम् । अतः गोविन्दस्य स्थाने मया भागः स्वीकर्तव्यः ।

राधेश्यामः – गोविन्दः अनुभवी अस्ति यतः सः विगतवर्षे राज्यस्तरीय–प्रतियोगितायां रजतपदकं प्राप्तवान् । अतः भवान् गोविन्देन सह एतस्यां प्रतियोगितायां भागं गृह्णातु ।

राधेश्यामः – क्षेपकन्दुकक्रीडायां बास्केटबॉलक्रीडायां च गतवर्षीयौ दलौ एव भागं ग्रहीष्यतः । अवधानेन श्रूयताम् । भवद्भिः क्रीडायाः भावनाः अपि ज्ञातव्याः ।

श्यामः – वयं विगतवर्षे निर्णायिकायां पादकन्दुकप्रतियोगितायां सेंटपीटरविद्यालयं पराजितवन्तः । ते अस्माकं अपेक्षया क्रीडाकुशलाः आसन् । वयं कृष्णप्रीत्यै एतां



प्रतियोगितां विजेतुम् इष्टवन्तः अतः अस्माभिः कृष्णः मनोभिः प्रार्थितः । वयं क्रीडाक्षेत्रे मानसिकसन्तुलनम् अत्यजन्तः तेषाम् आक्रमणानां प्रत्युत्तराणि उत्तमरीत्या दत्तवन्तः । तस्मात् वयं विजेतारः अभवाम । वयं क्रीडाभावनया क्रीडितवन्तः न वा ?

राधेश्यामः – आम् ! भवन्तः खेलभावनया एव क्रीडितवन्तः । न केवलाः दर्शकाः भवतां समर्थनं कृतवन्तः अपि तु सेंटपीटरविद्यालयस्य छात्राः अपि समर्थनं कृतवन्तः । क्रीडा जेतुं वा पराभवितुं वा न क्रीड्यते । अस्माभिः क्रीडाप्रतिभाप्रदर्शनेन सह मानवीयाः गुणाः अपि प्रदर्शनीयाः । अहम् आशासे यत् भवन्तः एतया भावनया एव एतस्मिन् वर्षे अपि क्रीडिष्यन्ति ।

* हरे कृष्ण !*

*प्रश्नोत्तर–विभागः*

१. एतस्मिन् वर्षे क्रीडाप्रतियोगिता कुत्र भविता अस्ति ?

२. अस्माकं विद्यालयः कासु क्रीडासु प्रसिध्दिं प्राप्तवान् अस्ति ?

३. गतवर्षे अस्माकं दलः कस्यां क्रीडायां विजेता आसीत् ?

४. प्राशन्तः कथं क्रीडति ?

५. केन क्रीडकेन अधिकानि गोलानि कृतानि ?

६. भक्तिवेदान्तगुरुकुलस्य दलः (टीम्) कथं विजयं प्रप्तवान् ?

७. राज्यस्तरीयाप्रतियोगितायां रजतपदकं कः प्राप्तवान् ?

८. भवतः रुचिः कस्यां क्रीडायाम् अस्ति । किमर्थम् ?

९. क्रीडायाः उद्देश्यं किम् ? स्वशब्देषु विलिख्यताम् ।

१०. भवते का क्रीडा अतीव रोचते ? किमर्थं रोचते ? स्वशब्देषु विवेचनं क्रियताम् ।

## *रिक्त–स्थानं पूरयन्तु*

१. श्यामः – गतवर्षे अस्माकं दलः राज्यस्तरीयायाः पादकन्दुकक्रीडायाः विजेता _________ ।

२. प्रशान्तः पवनः उमेशः गिरीशः च उत्तमाः _________ ।

३. मोहनः – महोदय ! अहं अपि पञ्चाशत्मीटरतरणप्रतियोगितायां गोविन्दं ______प्रथमः अभवम् । अतः गोविन्दस्य स्थाने मया भागः ______ ।

४. राधेश्यामः – ___________बास्केटबॉलक्रीडायां च गतवर्षीयौ दलौ एव भागं ग्रहीष्यतः । अवधानेन _________ , भवद्भिः क्रीडायाः भावनाः ज्ञातव्याः ।

५. अस्माभिः क्रीडाप्रतिभाप्रदर्शनेन सह ___________ गुणाः अपि प्रदर्शनीयाः ।

६. गोपालः – अहं एव विजेता ___________।

७. ते अस्माकं अपेक्षया क्रीडाकुशलाः __________।

८. अहम् _________ यत् भवन्तः एतया भावनया एव एतस्मिन् वर्षे अपि क्रीडिष्यन्ति ।

९. विगतवर्षे ये तरणक्रीडायां भागं __________आसन् तेषु रामं विहाय सर्वे अपि ________सन्ति ।

१०.वयं ________ एतां प्रतियोगितां विजेतुम् इष्टवन्तः अतः अस्माभिः कृष्णः________ प्रार्थितः ।

॥ हरि ॐ तत्सत् ॥

षष्ठः अध्यायः

# कथोपकथनम् – ४ ( गुरुकुले जन्माष्टमीमहोत्सवः )



( जन्माष्टमीमहोत्सवात् पञ्चदशदिनानिपूर्वं तस्य कृते अतीववेगेन कार्यं प्रचलति । गुरुकुलस्य आचार्यः सर्वान् आहूय सभायोजनं करोति । )

प्राचार्यः – बहुप्रसन्नतायाः विषयः अधुना उपस्थितः । भवन्तः सर्वेऽपि जानान्ति एव यत् जन्माष्टम्याः पञ्चदशदिनानि अवशिष्टानि सन्ति । अस्माभिः भव्यः महोत्सवः अपि करणीयः अस्ति । भक्तिवेदान्तगुरुकुलविद्यार्थिनः प्रतिवर्षं जन्माष्टम्यवसरे सांस्कृतिकेन कार्यक्रमेण स्वप्रतिभां प्रदर्शयन्ति । छात्राः कलाप्रदर्शनेन दर्शकान् कृष्णभक्तेः शिक्षाम् अपि ददति । छात्रैः एतस्मिन् वर्षे अपि जन्माष्टमीमहोत्सवः भव्यरूपेण आयोजनीयः । अस्मिन् विषये स्व स्व विचारं स्थापयन्तु । कः किं करिष्यतीति भगवत्प्रीत्यै ?

सङ्गीतशिक्षकः – अहम् एतस्मिन् वर्षे कार्यक्रमद्वयं कारयिष्यामि ।

प्राचार्यः – तत् किम् ?

सङ्गीतशिक्षकः – मम विद्यार्थिनः सर्वप्रथमं मङ्गलाचरणं गास्यन्ति । ते ततः परं विभिन्नैः तालैः मृदङ्गवादनं करिष्यन्ति ।

प्राचार्यः – एतावत् पर्याप्तं नास्ति । अस्माभिः वैष्णवभजनं तु अवश्यम् एव गातव्यम्।

सङ्गीतशिक्षकः – समीचीनम् एव उक्तम् । मध्यरात्रौ हरेकृष्णकीर्तनं तु भविष्यति एव । परन्तु छात्राः कीर्तनात् पूर्वं भवदिष्टं वैष्णवभजनम् अपि गास्यन्ति ।

प्राचार्यः – अतीव सुन्दरम् । प्रह्लाद महोदय ! भवता प्रतिवर्षं मनोहराणि नाटकानि संपाद्यन्ते । एतस्मिन् वर्षे नाटकस्य विषयः कः ।




प्रह्लाद महोदयः – प्रतिवर्षं यथा भवति तथैव एत्स्मिन् वर्षे अपि अल्पवयस्काः छात्राः कालियदमनलीलां संगीतनाटकमाध्यमेन प्रदर्शयिष्यन्ति । तथा ज्येष्ठाः छात्राः अपि श्रीकृष्णजन्मलीलां नाटकमाध्यमेन आङ्ग्लभाषया प्रस्तुतां करिष्यन्ति ।

प्राचार्यः – नाटकद्वयस्य विषयवस्तु उत्तमम् अस्ति । कृपया छात्रान् सम्यक् प्रकारेण अभ्यासं कारयतु यस्मात् तेषां प्रदर्शनं सर्वचित्ताकर्षकं भवेत् ।

प्रह्लाद महोदयः – तथैव प्रयत्नं करिष्यामि । भवद्भिः इषदपि चिन्ता न करणीया ।

प्राचार्यः – अहं एतस्मिन् वर्षे परमपूज्यान् गोपालकृष्णगोस्वामिनः आहूतवान् । ते अत्र आगत्य अस्मान् विशेषप्रवचनं श्रावयिष्यन्ति ।

प्रह्लाद महोदयः – उत्तमः विचारः । अहं तस्य प्रवचनं श्रुतवान् आसम् । तत् प्रवचनं अतीव हृदयस्पर्शी सारगर्भितं च आसीत् ।

प्राचार्यः – अधुना मया मुख्यातिथिरूपेण कश्चिदपि न निर्दिष्टः अस्ति । भवतां कः विचारः ?

राधेश्याम महोदयः – मम विचारः अस्ति यत् एतस्मिन् वर्षे राज्यपालः आहूयताम् ।

पवन महोदयः – अहं चिन्तयामि यत् शिक्षानिर्देशकः आहूयताम् ।

बलराम महोदयः – यदि शिक्षा मन्त्री आगच्छेत् तर्हि कथं भवेत् ?
प्राचार्यः – गत वर्षे अस्माभिः शिक्षानिर्देशकः आहूतः आसीत् । एतस्मिन् वर्षे वयं राज्यपालम् आह्वास्यामः । यदि सः न आगच्छति चेत् वयं शिक्षामन्त्रिणम् आह्वास्यामः ।

प्राचार्यः – जन्माष्टमीमहोत्सवस्य सञ्चालनस्य कृते छात्रेषु कः उपयुक्तः अस्ति ?

जयदेवप्रभुः – मोहनः उत्तमं सञ्चालनं करिष्यति । अन्ये छात्राः अपि एतस्य सहायं करिष्यन्ति ।

प्राचार्यः – अहम् आशासे भवतां सहायेन एतस्मिन् वर्षे अपि जन्माष्टमीमहोत्सवः सफलतां प्राप्स्यति । हरे कृष्ण !

( जन्माष्टम्याः पूर्वस्मिन् दिने विद्यार्थिनः भक्तिवेदान्तगुरुकुलस्य सज्जीकरणाय संलग्नाः सन्ति । )

मोहनः – भो मित्राणि ! अस्माभिः सज्जीकरणाय मुख्यकार्यत्रयं संपादनीयम् । राघवः मञ्चसज्जीकरणसेवायाः संयोजकः अस्ति । रामः गुरुकुलप्राङ्गणस्य स्वच्छातायै सज्जीकरणाय च संयोजनं करिष्यति । गोविन्दः मुख्यद्वारस्य सज्जीकरणं कारयिष्यति ।

( राघवः स्वमित्रैः सह मञ्चसज्जीकरणाय प्रयतते । )

राघवः – गुप्तापटमण्डपस्य कर्तुः जनाः अत्र सज्जीकुर्वन्तः सन्ति । अच्युत! भवान् एतेषां कार्येषु अवधानं ददातु । मण्डपस्य ऊर्ध्वभागे नीलवर्णीयं पटं, मण्डपस्य पृष्ठभागे श्वेतवर्णीयं पटं तथा अग्रभागे रक्तवर्णीयं पटं स्थापयितुं आदिशतु ।

राघवः – श्याम ! भवान् कार्यक्रमस्य कृते पञ्चशतानाम् आसन्दानां व्यवस्थां करोतु । भूमौ कटान् सम्यक्तया विस्थापयतु । कार्यक्रमस्थले वात–नुकूलितयन्त्राणां च व्यवस्थां करोतु ।

राघवः – मुकुन्द! गुरुकुलस्य अन्तर्द्वारे चतसृणां प्रपाणां व्यवस्थां करोतु । तत्र प्रपासु शीतलस्य जलस्य प्रबन्धं करोतु ।

( रामः स्वमित्रैः सह गुरुकुलप्राङ्गणस्य स्वच्छतां सम्पादयति । )

रामः – भो ! दामोदर ! वासुदेव ! विष्णु ! हरि ! अत्र आगच्छन्तु । अस्माभिः अजिरं आलिन्दाः च सम्मार्जनीयाः । तेषां सज्जीकरणार्थं लो–ईबाजारतः चित्रितकागदानि, द्युतकागदानि, बृहत्कागदानि, संश्लेषणद्रव्यं, वायुकन्दुकानि, विभिन्नाः रागाः, कीचकाः, चित्रारंभाः लेखन्यः, पुष्पादीनि

वस्तूनि आनेतव्यानि सन्ति । दामोदर ! भवान् वस्तूनि आ–नीय बृहत्प्रकोष्ठे स्थापयतु । वासुदेव ! भवता बृहत्कागदेषु चित्राङ्कनं करणीयम् अस्ति । विष्णो ! भवता वायुकन्दुकेषु वायुः पूरणीयः । हरे ! भवता विभिन्नैः वर्णैः रङ्गावल्यः सज्जीकरणीयाः ।



गोविन्दः स्वमित्रैः सह मुख्यद्वारं अलङ्करोति ।

**गोविन्दः** – हे माधव, श्याम, बलराम ! अत्र आगम्यताम् । वयं मुख्यद्वारं भूषितं करिष्यामः । माधव ! भवान् मुख्यद्वारम् उभयतः कदलीवृक्षौ, तोरणं च स्थापयतु तथा द्वारस्य ऊपरि श्रीकृष्णस्य आविर्भावलीलायाः चित्रं संस्थाप्य वायुकन्दुकैः सज्जीकरोतु । श्याम ! भवान् श्रीलप्रभुपादस्य पुस्तकानां वितर–णस्य कृते वैज्ञानिकचित्राणां प्रदर्शनस्य कृते च एकं पण्यस्थानं निर्मातु । बलराम ! भवान् पुष्पवाटिकायां कृत्रिमनिकुञ्जस्य निर्माणं करोतु । तत्र पुष–पयुक्तः लघु सरोवरः, दोलनं, राधाकृष्णविग्रहम्, मयूराः, सारसाः, वानराः, शुकाः, शारिकाः, कोकिलाः च भवेयुः ।

( जन्माष्टमीदिवसे सांस्कृतिककार्यक्रमस्य आरम्भात् पूर्वं प्रधानसंयोजकः मोहनः अन्तिमं सर्वेक्षणं कुर्वन् अस्ति । तेन साकं गिविन्दः रामः राघवश्च सन्ति । )

**मोहनः** – (मण्डपं दृष्ट्वा) अहो ! पश्यतां मण्डपस्य अद्भुतं सज्जीकरणम् ।

**राघवः** – गुप्तापटमण्डपस्य कर्तुः जनाः कार्यकुशलाः सन्ति । वयं यथा

आदिष्टवन्तः तथैव ते संपादितवन्तः ।

मोहनः – प्रष्ठचित्रं के अङ्कितवन्तः ?

राघवः – नवमकक्षायाः छात्राः कलाशिक्षकस्य नेतृत्वेन अङ्कितवन्तः ।

मोहनः – एतस्य चित्रस्य भावः भक्तिमयः वर्तते । राघव ! भवान् स्वदायित्वं उत्तमरीत्या संपादितवान् । आचार्यमहोदयाः भवतः चेष्टया गर्वं अनुभविष्यन्ति ।

मोहनः – राम! प्राङ्गणस्य सुन्दरतायै भवता यत् कृतं तत् सर्वं दर्शयतु ।
रामः – अत्र अलिन्दाः पश्यन्ताम् । पुष्पैः आम्रपत्रैः च युक्तैः तोरणैः अलङ्कृताः अलिन्दाः गुरुकुलस्य सौन्दर्यं वर्धयन्ति । उपरि पश्यतु । गुरुकुलस्य चत्वारः कोणाः वायुकन्दुकैः भूषिताः सन्ति । कार्यक्रमक्षेत्रस्य प्रवेशद्वारम् अपि रङ्गावलिभिः सुसज्जितम् अस्ति ।

मोहनः – मया अनुभूयते यत् भवतः सज्जीकरणदलेन बहुपरिश्रमेण अत्र वृन्दावनम् एव आनीतम् ।

रामः – एतैः सर्वैः कृष्णचेतनया उत्साहेन च ह्यः संपूर्णरात्रौ सज्जीकरणादीनि कार्याणि कृतानि ।
मोहनः – भवन्तः स्वसेवया कृष्णकृपाम् अवश्यम् एव प्राप्स्यन्ति ।

गोविन्दः – मोहन! मुख्यद्वारं प्रति चलित्वा तत्रत्य कृतस्य सज्जीकरणस्य सिद्धताम् अवलोकयतु ।

मोहनः – (मुख्यद्वारं दृष्ट्वा) अहो ! एतत् दर्शनीयम् अस्ति । एतस्य वर्षस्य मुख्यद्वारस्य सज्जा सर्वान् अवश्यम् आकर्क्ष्यति ।

गोविन्दः – पश्यतु अत्रत्य पुस्तकवितरणस्थलं प्रसादवितरणस्थलं च । अत्र पश्यताम् । श्रीमद्भागवतस्य सन्देशाः वैज्ञानिकपोस्टरैः वर्णिताः सन्ति ।

मोहनः – अति उत्तमम् । वैज्ञानिकपोस्टराणि कस्य मानसानि उत्पादानि ?

गोविन्द – उपाचार्यः एतेषां कर्ता ।

प्राचार्यः – (तत्रागत्य मोहनं संबोधयति) अहो ! भवद्भिः गुरुकुलस्य सज्जीकरणं अतीव मनोहरं रमणीयं शोभनं च कृतम् । अहं सर्वं निरीक्ष्य अनुभवामि यत् भवतां प्रचेष्टाः श्रीलप्रभुपादस्य कृपया सफलतां प्राप्तवत्यः । मित्रैः सह मोहनः – वयं प्रसन्नाः स्मः यत् भवन्तः अस्माकं प्रचेष्टाभिः मुग्धाः सन्ति ।

प्राचार्यः – अधुना सांस्कृतिकाः कार्यक्रमाः शीघ्रम् एव प्रारभ्यन्ताम् । भवन्तः प्रयासं कुर्वन्तु यत् सर्वे कार्यक्रमाः निर्धारितेन समयेन एव भवेयुः । हरे कृष्ण !

* हरे कृष्ण *

*<u>प्रश्नोत्तर–विभागः</u>*

१. जन्माष्टम्याः कतिदिनानि पूर्वम् आचार्यः सभायोजनं कृतवान् ?

२. गुरुकुलविद्यार्थिनः कलाप्रदर्शनेन दर्शकान् कस्याः शिक्षां ददति ?

३. गुरुकुलविद्यार्थिनः कार्यक्रमस्य प्रारम्भे किं गायन्ति ?

४. एतस्मिन् वर्षे विद्यार्थिनः किं किं संपादयिष्यन्ति ?

५. एतस्मिन् वर्षे नाटकस्य विषयः कः ?

६. एतस्मिन् वर्षे अल्पवयस्काः छात्राः ज्येष्ठाः छात्राः च किं किं प्रदर्शयिष्य–

तः ?

७. आचार्यः प्रवचनं श्रावयितुम् कम् आहूतवान् ?

८. मुख्यातिथिरूपेण आमन्त्रणविषये शिक्षकानां विचारान् वर्णयन्तु ।

९. जन्माष्टमीमहोत्सवस्य सञ्चालनं कः करोति ?

१०. मोहनः सज्जीकरणस्य कृते केषां चयनं करोति ?

११. राघवः अच्युतं किं स्थापयितुम् आदिशति ?

१२. राघवः मुकुन्दं कां व्यवस्थां कर्तुम् उपदिष्टवान् ?

१३. रामः गुरुकुलप्राङ्गणस्य स्वच्छतायै कान् आह्वयति ?

१४. ते लोईबाजारतः कानि वस्तूनि आनयन्ति ?

१५. माधवः मुख्यद्वारं कथं सज्जीकरोति ?

१६. भवान् स्वगृहे जन्माष्टम्याः आयोजनं केन प्राकरेण करिष्यति ? वर्णयतु ।

## *रिक्त–स्थानं पूरयन्ति*

१. गोविन्दः श्यामं किं _____ वदति ?

२. पुष्पवाटिकायां निर्मितस्य ___________ वर्णनं कुर्वन्तु ।

३. पृष्ठचित्रं के ___________ ?

४. आलिन्दाः कैः अलङ्कृताः गुरुकुलस्य सौन्दर्यं ___________ ?

५. वैज्ञानिकपोस्टरैः कस्य सन्देशाः __________ ?

६. भवन्तः जन्माष्टमीमहोत्सवस्य ________ किं किं कृतवन्तः ?

७. भवन्तः जन्माष्टमीमहोत्सवस्य अवसरे प्रवचनेन किं किं _______ ?

८. जन्माष्टमीदिने गुरुकुले अभिषेकः कदा ___________?

९. गुरुकुले जन्माष्टमीमहोत्सवस्य सञ्चालनं केन कृतम् ?

१०. भवन्तः जन्माष्टमीमहोत्सवस्य सिद्धतायै किं किं कर्तुं शक्नुवन्तः ? स्वविचारान् स्थापयन्तु ।

११. सम्पूर्णकार्यक्रमे भवते किम् ________ ?

१३. सर्वेषां कार्यकर्तॄणां मध्ये कस्य सेवा भवन्तम् _________? तत्र किं कारणम् ? वर्णयन्तु ।

॥ हरि ॐ तत्सत् ॥

सप्तमः अध्यायः

# सर्वप्रदाता श्रीकृष्णः –१

## *प्रथमं दृश्यम्*

राधेश्यामः भक्तिवेदान्तगुरुकुले शिक्षकः अस्ति । एकदा सः ग्रीष्मावकाशे गृहम् अगच्छत् । गोपालः एकस्मिन् दिने प्रातः अटनसमये तं मिलितवान् । सः प्रथमं वारं कृष्णभावनामृतविषये तस्मात् श्रुतवान् । गोपालः गृहम् आगत्य यत् श्रुतमासीत् तत् सर्वं चिन्तनं कृतवान् । तेन शीघ्रमेव अनुभूतं यत् तस्य बहवः सन्देहाः सन्ति । सः अग्रिमे दिने राधेश्यामेन सह मेलितुं स्वसन्देहान् च स्पष्टयितुं अतीव उत्सुकः आसीत् ।

**गोपालः** – महोदय ! भवता उक्तं यत् एतत् शरीरं मम पित्राभ्यां प्रदत्तं किन्तु तौ न सृष्टारौ ।

**राधेश्यामः** – आम्! भवता साधु उक्तम् ।

**गोपालः** – परन्तु कथम् एतत् अहं न अवगच्छामि ।

**राधेश्यामः** – भवतः शरीरस्य प्रारम्भः एककोशिकातः भवति । सा एककोशिका मातुः अर्द्धकोशिकया सह पितुः अर्द्धकोशिकायाः सम्मेलनेन संभवति । एषा प्रथमा कोशिका यस्याः विभाजनेन एव एतस्य शरीरस्य निर्माणं भवति । अतः भवतः मातापितरौ निमित्तमात्रौ स्तः । न तु प्रथमकोशिकायाः निर्मातारौ इति । यया एतत् शरीरं विकसितम् । प्रकृतिः एव



प्रथमायाः कोशिकायाः जननी इति सिद्धम् ।



**गोपालः** – यदि प्रकृतिः एव उत्पत्तेः कृते उत्तरदायिनी तदा ईश्वरस्य का भूमिका ?

**राधेश्यामः** – त्वया तु उत्तमः प्रश्नः कृतः । एतत् विद्युतीयं क्रीडनकं पश्यतु । यदा अहं कृष्णं पिञ्जं नोदयामि तदा एतत् चलति । तत्पश्चात् एतत् दूरस्थ–नियन्त्रकेण एव नियन्त्रितं भवति । भवता कथयितुं शक्यते यत् एतत् क्रीडनकं विद्युतयन्त्रेण कार्यं करोति ।

गोपालः – एतत् विद्युतीयं यन्त्रं एकेन अभियन्त्रा यन्त्रागारे निर्मितम् अस्ति ।

राधेश्यामः – उत्तमम् ! क्रीडनकं विशिष्टविद्युतयन्त्रस्य नियमं पालयति (अनुसरति) । अभियन्ता एतस्य पृष्ठतः कार्यं करोति । अतएव एषः नियमः स्वतः न प्रादुर्भूतः ।

गोपालः – अहो ! अवगतं यत् प्रकृतेः नियमाः ईश्वरेण चाल्यन्ते । अतः प्राकृतिकाः नियमाः स्वतः न प्रकटीभूताः।

राधेश्यामः – अतएव भगवान् श्रीकृष्णः गीतायां (९.१०) प्रमाणयति ।

*मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।*
*हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥*

एतस्य श्लोकस्य अयं भावः –

एषा भौतिकी प्रकृतिः मम (कृष्णस्य) बहुषु शक्तिषु एका शक्तिः अस्ति । एषा मम (कृष्णस्य) निर्देशेन कार्यं करोति । हे कौन्तेय ! (कुन्तीपुत्र अर्जुन!) एतया सम्पूर्णस्य चराचरस्य जगतः सृष्टिः भवति । एतेन हेतुना एतत् जगत् वारम्वारम् उत्पन्नं भवति पुनः विनष्टं च भवति ।



**गोपालः** – अतः ईश्वरः एव वास्तविकः स्रष्टा । मम शरीरं मातापित्रोः माध्यमेन ईश्वरस्य उपहारम् एव अस्ति । धन्यवादः ।

**राधेश्यामः** – अहं तव तत्त्वबोधस्य अवगमने सहायकः भूत्वा अतीव प्रसन्नोऽस्मि । श्वः पुनः अस्मिन् काले मिलावः तथा प्रातः अटनस्य आनन्दम् अनुभवावः ।

## द्वितीयं दृश्यम्

( गोपालः राधेश्यामः च अग्रिमे दिने अटनसमये पुनः मिलतः । )

**गोपालः** – अहं ह्यः दूरदर्शनस्य विज्ञानचैनलमाध्यमेन एकं कार्यक्रमं दृष्टवान् । तेन कार्यक्रमेण एतत् दर्शितं यत् एककोशिकायुक्तात् जीवात् कथम् एकं मानवजीनं शनैः शनैः क्रमागतोन्नत्या संभवति । अहम्‌ एतेन परि–णामवादसिद्धान्तेन (Evolution theory) भ्रमितः अस्मि ।



**राधेश्यामः** – केचित् वैज्ञानिकसमुदायाः एतस्मिन् सिद्धान्ते विश्वासं कुर्वन्ति । परन्तु कश्चिदपि सिद्धं न कर्तुं शक्नोति यत् वानरस्य जीनं मनुष्यजीनरूपेण विकसितं भवितुं(विकासं प्राप्तुं) शक्नोति । यावत् वैज्ञानिकाः वानरजीनेन मनुष्यं न जनयन्ति तावत् परिणामवादः एकः सिद्धान्तः एव ।

**गोपालः** – वेदाः जीनपरिणामवादविषये किं प्रतिपादयन्ति ?



**राधेश्यामः** – पद्मपुराणे वर्णितम् अस्ति यत् चतुराशीतिः लक्षाणि योनयः सन्ति । ब्रह्मणा आदिष्टाः प्रजापतयः एतासां चतुराशीतिलक्षाणां योनिनां सृष्टेः कृते निमित्ताः जाताः । प्रत्येकः प्रकारः स्वजीनं भविष्यवंशावल्यां प्रजननप्रक्रियया प्रेषयति । अतः एकः मनुष्यः स्वसन्ततिम् एकमेव मानवजीनम् प्रेषयति । तथैव एकः वानरः अपि स्वसन्ततिं केवलं वानरजीनमेव प्रेषयितुं शक्नोति ।

**गोपालः** – एतस्य अर्थः ब्रह्मा प्रजापतिनां उत्पत्तौ निमित्तः जातः । एते प्रजापतयः अपि चतुराशीतिलक्षाणां योनिनाम् उत्पत्तौ निमित्ताः जाताः। एताः योनयः सचराचरस्य नित्यतां स्थिरीकर्तुं निमित्तभूताः कार्यं कुर्वन्त्यः सन्ति । परन्तु वास्तविकतायां तु ईश्वरः एकाकी एव एतासां योनिनां स्रष्टा ।

**राधेश्यामः** – गोपाल ! भवान् अतीव बुद्धिमान् अस्ति । अहं तव बुद्धेः प्रशंसां करोमि ।

गोपालः – भवतः सङ्गात् अद्य अहं कृतार्थः अभवम् । मया ज्ञातं च यत्

वयं सर्वे ईश्वरेण एव रचिताः स्मः ।



राधेश्यामः – न केवलाः जीवलोकाः ईश्वरेण स्रष्टाः अपितु सर्वेऽपि एतस्यां स्रष्टौ विद्यमानाः समस्ताः पदार्थाः तस्मात् एव उद्भूताः । तस्मात् कारणात् एव सूर्यः सर्वेभ्यः लोकेभ्यः प्रकाशं ऊष्णतां च प्रयच्छति । चन्द्रोऽपि तस्मात् कारणात् एव अस्तित्वे भूत्वा स्वज्योत्स्नया शाकादीन् औषधीः च पुष्णाति । अतः निष्–कर्ष्यते यत् सर्वं ईश्वरेण एव प्रदीयते ।

गोपालः – आम् ! ईश्वरः अस्मभ्यं सर्वं प्रयच्छति । जलं यत् वयं पिबामः, वायुः येन वयं श्वसनं कुर्मः सूर्यप्रकाशः यस्मात् सर्वे जीवाः पुष्टाः भवन्ति । अन्नं यत् वयं खादामः तत् सर्वम् अपि ईश्वरात् एव आगच्छति ।

राधेश्यामः – न केवलं तत् सर्वं ईश्वरेण उत्पद्यते अपितु एतस्मिन् संसारे एकः प्राणी अन्यस्मिन् निर्भरः अस्ति । ईश्वरं विहाय किंचिद् अपि पूर्णतया स्वतन्त्रं नास्ति ।

गोपालः – महोदय ! अहं न अवगतवान् । भवद्भिः इतोऽपि विस्तारेण उच्यताम् ।

राधेश्यामः – पश्यतु, वयं तृणानाम् उपरि पर्यटनं कुर्मः। तृणं कः खादाति ?

गोपालः – गोमाता अन्ये च पशवः ।

राधेश्यामः – गोमाता किम् उत्पादयति ?

गोपालः – पौष्टिकं दुग्धम् ।

राधेश्यामः – दुग्धं कः पिबति ?

गोपालः – वत्साः वयं च ।

राधेश्यामः – तदेव मम अभिप्रायः आसीत् । यदि वयं गोमातरं प्रकृतिं च सम्यक् रक्षामः तदा मानवजातिः दुग्धयुक्तेन पौष्टिकाहारेण लाभान्विता भविष्यति । तथैव यदि वयं वन्यजीवान् पशून् यथा व्याघ्रादीन् रक्षामः चेत् विशालानि वनानि अपि सुरक्षितानि भविष्यन्ति । तदैव एतानि अपि पारितन्त्रे सहायकाः भविष्यन्ति ।

गोपालः – वनं व्याघ्रजनसङ्ख्यातः कथं रक्षितं भवति ?




राधेश्यामः – तत् अवगन्तुं बहुसरलम् अस्ति । व्यघ्राः मृगान् खादित्वा जीवनं निर्वहन्ति । मृगाः अपि वनस्पतिषु निर्भराः सन्ति । यदि तत्र व्यघ्राः न भविष्यन्ति चेत् मृगाः वर्धिष्यन्ते । तदा ते स्वयमेव वनं नाशयिष्यन्ति । यदा वनानि नष्टानि भविष्यन्ति तदा मृगाः अपि अन्नाभावात् नष्टाः भविष्यन्ति । यदि व्याघ्राः वने तिष्ठन्ति चेद् हरिणसंख्यायां सिंहसंख्यायां च सन्तुलनं भविष्यति । एतेन पारितन्त्रस्य सुरक्षा भवति । परन्तु लोभिनः जनाः बहुसङ्ख्यकान् व्याघ्रान् मारितवन्तः । तस्मात् बहुषु वनेषु तेषां जातिः एव लुप्ता जाता । परिणामतः अरण्यानि अपि नष्टानि जातानि । यदा अरण्यानि नश्यन्ति तदा मृत्तिकाक्षयस्यापि समस्या पुरतः आपतति । अनावृष्टेः अपि

सम्भावना वर्धते । तस्मात् सम्पूर्णे पारिस्थितिकतन्त्रे अव्यवस्था संघटते । अतएव अस्माभिः ईश्वरस्रष्टेः सम्मानः करणीयः । तथा च एतादृशं कार्यं करणीयं यस्मात् सर्वेषां लाभः भवेत् । तर्हि एव ईश्वरः अस्मासु प्रसन्नः भविष्यति ।

गोपालः – अन्यस्मिन् दिने भवान् ईशावास्यमिदं सर्वम् इत्यस्य मन्त्रस्य व्याख्यां कुर्वन् आसीत् । अहं चिन्तयामि एतत् अत्र युक्तम् अस्ति ।

राधेश्यामः – भवान् प्रासङ्गिकम् उक्तवान् ।

*ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।*
*तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ॥*

गोपाल ! पुनः मिलामः । हरे कृष्ण !

* हरे कृष्ण !*

<u>*प्रश्नोत्तर विभागः*</u>

१. राधेश्यामः कुत्र पाठयति ?

२. मार्गे गोपालः केन सह मिलति ?

३. जीन्–विषयकं वैज्ञानिकं मतं वर्णयतु ।

४. पद्मपुराणे सृष्टिविषये किं वर्णितम् अस्ति ?

५. सूर्यः कुतः प्रकाशम् ऊष्णतां च प्राप्नोति ?

६. प्रकृतिः कस्य अधीना अस्ति ?, सप्रमाणं लिखन्तु ।

७. ईश्वरः किं किं प्रयच्छति ?

८. गोमाता रक्षणे कः लाभः , सिंहरक्षणे च ? सविस्तारं लिखन्तु ।

९. सिंहैः वनानि कथं रक्ष्यन्ते ? लिखन्तु ।

१०. भौतिकीप्रकृतिः भगवतः शक्तिः अस्ति न वा ? गीतायाः प्रमाणमपि लिखन्तु ।

११. एतस्य विश्वस्य वास्तविकः कर्त्ता कः ?

## *रिक्त–स्थानं पूरयन्तु*

१. गोपालः गृहं __________ यत् श्रुतमासीत् तत् सर्वं __________ कृतवान् ।

२. तत्पश्चात् एतत् ____________ नियन्त्रितं भवति ।

३. गोपालः – अहो ! अवगतं यत् प्रकृतेः नियमाः __________ चाल्यन्ते ।

४. मम शरीरं _______ माध्यमेन ईश्वरस्य _________एव अस्ति ।

५. व्यघ्राः मृगान् खादित्वा जीवनं __________ ।

६. तथा च कार्यः करणीयः यस्मात् सर्वेषां लाभः भवेत् ।

७. यदि वयं गोमातरं प्रकृतिं च सम्यक् रक्षामः तर्हि मानवजातिः दुग्धयुक्तेन पौष्टिकाहारेण लाभान्विता भविष्यति ।

८. __________ किंचिद् अपि पूर्णतया स्वतन्त्रं नास्ति ।

९. यदा अरण्यानि नश्यन्ति तदा ________समस्या पुरतः आपतति ।

१०. तस्मात् सम्पूर्णे __________अव्यवस्था संघटते ।

॥ हरि ॐ तत्सत् ॥

अष्टमः अध्यायः

# सर्वप्रदाता श्रीकृष्णः – २

## प्रथमं दृश्यम्

( कृष्णाङ्गी मातायशोदया सह मार्गे वार्तालापं कुर्वती विद्यालयं गच्छति । )

यशोदा – प्रिये कृष्णाङ्गी ! शीघ्रं करोतु । अस्माभिः तव विद्यालयं प्राप्तुम् एकमाइलपरिमितं चलितव्यम् अस्ति ।

कृष्णाङ्गी – माताः ! अहं सिद्धा , चल्यताम् , मह्यं मम विद्यालयः बहु रोचते । मम शिक्षकाः मधुराः दयालवः च सन्ति ।

यशोदा – भवती ह्यः किं शिक्षितवती ? किमपि विशेषम् ?

कृष्णाङ्गी – अहं बहून् विषयान् शिक्षितवती । अस्माकं कक्षाशिक्षकः अस्मान् एकं पद्यं स्मारितवान् ।

यशोदा – एवं वा ? श्रावयतु ।

कृष्णाङ्गी –

*अहो बत कृता तेन आपादशिरसोऽहं वै ।*
*कृपापूर्णेन देवेन सङ्कल्पमेव पूर्तये ॥*
*सुस्थापयति तारान्यः सूर्यो येन च भाषते ।*
*स एव ईश्वरः श्रीशः कुर्यात्कृपामहेतुकीम् ॥*
*स अन्तर्यामी जानाति मम हितं विशेषं मत् ।*
*अहं क्रन्दामि नष्टाय क्रीडनकाय बालवत् ॥*

अन्धकारे तु भूते हि सहायार्थे हि रोदिमि ।
मार्गं प्रदर्श्य देवः स रक्षति च पुनः पुनः ॥

यशोदा – मम प्रिये ! त्वया एतत् पद्यं सम्यक् प्रकारेण स्मृतम् । निश्चयं बहु सुन्दरं पद्यम् । किं त्वं एतस्य अर्थम् अवगच्छसि ?



कृष्णाङ्गी – अहं जानामि यत् ईश्वरेण अहं रचिता । अहम् इतोऽपि जानामि ईश्वरेण एते ताराः लोकाश्च निर्मिताः । ईश्वरः मम आवश्यकताः मम अपेक्षया अधिकं जानाति – एतस्य मर्म किम् ?

यशोदा – तव जनकेन मया च ईश्वरम् एका पाञ्चालिका याचिता । तस्य आशीर्वादेन एव त्वं अस्माकं जीवने आगता । त्वया अहं तव जन्मतः एव व्यस्ता कृता । अहं तव सेवायां भूत्वा बहु प्रसन्ना अस्मि । यत् किमपि भगवता अस्मभ्यं प्रदत्तं तत् पर्याप्तम् अस्ति । तव तु अभिभावकः (मातापितरौ) अस्ति । परन्तु एतस्मिन् संसारे बहवः बालकाः बालिकाः च अभिभावकं विना एव सन्ति । त्वं तु पठितुं प्रसिध्दं विद्यालयं प्राप्तवती



किन्तु एतस्मिन् संसारे बहवः बालकाः शिक्षातः वञ्चिताः सन्ति । प्रिये ! त्वम् अस्माकं गृहस्य निकषा एव क्रीडाक्षेत्रे प्रातः सायं च खेलति । रात्रौ तारान् द्रष्टुं निर्लिप्तम् आकाशम् अस्ति । त्वं गृहस्य समीपं नदीतटे बालुकागृहान् निर्माय आनन्दम्

अनुभवति । अस्माकं सुहृदाः परिवेशिनः त्वयि स्निह्यन्ति । किं एते सर्वे तव कृते पर्याप्ताः न सन्ति ?

कृष्णाङ्गी – आम् ! आम् ! ईश्वरः अतीव दयालुः अस्ति । तस्य कृपया एव अहं प्रसन्ना बालिका ।

यशोदा – प्रिये ! पश्यतु, तव विद्यालयः आगतः । अहं त्वां नेतुं पुनः अत्रैव द्विवादने आगमिष्यामि । हरे कृष्ण !

द्वितीयं दृश्यम्

( विद्यालयस्य घण्टानादः भवति । कृष्णाङ्गी स्वमित्रैः सखीभिः सह विद्यालयात् बहिः आगच्छति । सा स्वमातरं विद्यालयस्य प्रवेशद्वारे अवलोक्य धावित्वा तस्याः समीपं गतवती । )

कृष्णाङ्गी – मातः ! एतत् चित्रं पश्यतु, अहं अङ्कितवती । गोपालकृष्णः वेणुनादं कुर्वन् अस्ति ।

यशोदा – त्वं तु चित्राङ्कने पारङ्गता जाता । एतत् चित्रं मह्यं अतीव रोचते । गवा सह कृष्णः गोपालनाम्ना प्रसिद्धः । निवासं प्रति चलामः ।

कृष्णाङ्गी – कृष्णः गोमातरं किमर्थम् अधिकं प्रेम करोति ?



यशोदा – कृष्णः तु सर्वेषु जीवेषु स्निह्यति । परन्तु त्वया साधु उक्तं यत् कृष्णाय गोमाता विशेषरूपेण रोचते । गोमाता निःस्वार्थसेवायाः साक्षात् मूर्तिः अस्ति । सा किं

खादति ? वदतु ।

कृष्णाङ्गी – सा तृणं खादति ।



यशोदा – आम् ! सा तृणयुक्तं विशालं क्षेत्रम् इच्छति । तस्मात् सा अस्मभ्यं दुग्धरूपेण सम्पूर्णम् आहारं प्रतिददाति । यदा तव जन्म अभवत् तदा ते पिता पद्मां क्रीत्वा आनीतवान् । त्वं पद्मायाः दुग्धं जन्मतः अधुनापर्यन्तं पिबन्ती असि । अहं ते घृतयुक्ताः रोटिकाः प्रयच्छामि । तदपि पद्मायाः एव कृपा अस्ति ।

कृष्णाङ्गी – साधु उक्तम् । पद्मा मम द्वितीया अन्या माता एव । यदा अहं विद्यालयात् निवर्तनं करोमि तदा सा गोशालातः बहिः आगत्य मयि दृष्टिपातं करोति ।

यशोदा – वयं सर्वे कृष्णस्य परिवारे स्मः । सः स्वामी वयं सविकाः सेव–काः । एतेन भावेन एव कृष्णं सर्वप्रदातारूपेण द्रष्टुं शक्नुमः ।

कृष्णाङ्गी – आम् ! एकदा ते जनकेन अपि उक्तं आसीत् यत् सर्वम् अपि कृष्णसम्बन्धेन सुन्दरतां प्राप्नोति । पुष्पेषु सुगन्धः, प्रसादे सुस्वादुता, पद्मायाः सरलता, चन्द्रमसः शीतलता, कीर्तनस्य मधुरता च सर्वमपि कृष्णस्य स्वा–भाविकीसुन्दरतायाः प्रकाशः एव ।

* हरे कृष्ण !*

## *प्रश्नोत्तर विभागः*

१. कृष्णाङ्ग्याः मातुः नाम किम् ?

२. कृष्णाङ्ग्याः शिक्षकाः कीदृशाः सन्ति ?

३. कृष्णाङ्गी स्वमातरं किं श्रावितवती ?

४. कृष्णाङ्ग्याः गीतस्य भावार्थं लिखन्तु ।

५. ईश्वरेण के के रचिताः ?

६. यशोदा कृष्णाङ्ग्याः तुलनां कैः सः करोति ?

७. कृष्णाङ्ग्याः गृहस्य समीपं किं अस्ति ?

८. गवा सह कृष्णः केन नाम्ना प्रसिध्दः अस्ति ?

९. गोमाता अस्मभ्यं किं किं प्रयच्छति ?

१०. कृष्णेन सह अस्माकं कीदृशः सम्बन्धः अस्ति ?

११. कृष्णाङ्गी अन्यनिर्धनछात्राणाम् अपेक्षया किं किं प्राप्नोति ?

## *रिक्त-स्थानं पूरयन्तु*

१. _________ मम विद्यालयः बहु रोचते ।

२. कृष्णाङ्गी - अहं बहून् विषयान् __________ । अस्माकं कक्षाशिक्षकः अस्मान् एकगीतं ___________ ।

३. यशोदा - प्रिये! भवत्याः विद्यालयः पश्यतु । अहं भवतीं नेतुं पुनः द्विवादने अत्रैव _________ ।

४. परन्तु भवत्या साधु उक्तं यत् ________ गोमाता विशेषरूपेण ________ ।

५. गोमाता __________ साक्षात् मूर्तिः अस्ति ।

६. तव जनकेन मया च ईश्वरम् एका __________ याचिता ।

७. तस्य आशीर्वादेन एव _____ अस्माकं जीवने आगता ।

८. ____अहं ____ जन्मतः एव व्यस्ता कृता ।

९. अहं ______ सेवायां भूत्वा अतीव प्रसन्ना अस्मि ।

१०. अहं _______ नेतुं पुनः अत्रैव द्विवादने आगमिष्यामि ।

॥ हरि ॐ तत्सत् ॥